एकविंश: पाठ:

# सूक्तय:

संस्कृतसाहित्ये विद्यते सूक्तीनाम् अपारं भाण्डागारम्। बालानां कृते सूक्तय: महत्त्वपूर्णा: भवन्ति। ता: जीवने सन्मार्गदर्शिका: भवन्ति। विविधेभ्य: ग्रन्थेभ्य: ता: अत्र सङ्कलिता:।

1. इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितै: गुणै:।
2. उष्णो दहति चाङ्गार: शीत: कृष्णायते करम्।
3. कालेन फलते तीर्थं, सद्य: साधुसमागम:।
4. चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गति:।
5. छेदेऽपि चन्दनतरु: सुरभयति मुखं कुठारस्य।
6. तृणैरावेष्ट्यते रज्जुस्तया नागोऽपि बध्यते।
7. धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।
8. जितक्रोधेन सर्वं हि जगत् एतद् विजीयते।
9. अङ्गीकृतं सुकृतिन: परिपालयन्ति।
10. अक्षीणो वित्तत: क्षीणो, वृत्ततस्तु हतो हत:।
11. अजीर्णे भैषजं वारि, जीर्णे वारि बलप्रदम्।
12. अनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभि:।
13. क्षारं पिबति पयोधे: वर्षत्यम्भोधरो मधुरमम्भ:।
14. तीर्थोदकं च वह्निश्च नान्यत: शुद्धिमर्हत:।
15. आपत्काले च कष्टेऽपि नोत्साहस्त्यज्यते बुधै:।
16. दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनाम्।
17. गुणमेव वक्ति साधुर्दोषमसाधु: प्रकाशयति।

## शब्दार्थ:

इन्द्रोऽपि - देवानां राजा अपि। लघुताम् - न्यूनताम्। कृष्णायते - कृष्णं भवति। सद्य: - तत्क्षणम्। सुरभयति - सुरभितं करोति। आवेष्ट्यते - आबध्नाति। नाग:- गज:। परार्थे - परेषां कल्याणार्थम्।उत्सृजेत् - त्यजेत्। युक्तम् - उचितम्। प्रदीप्ते - प्रज्वलिते। वह्नि: - अग्नि:। भैषजम् - औषधम्। पयोधे: - समुद्रात्। अम्भोधरा: - जलद:। बुधै:- विद्वद्भि:। सुकृतिन: - सदाचारिण:।

# अभ्यासः

1. **एकपदेन उत्तरत –**

(क) अङ्गारः किं करोति ?

(ख) स्वयं प्रख्यापितैः गुणैः कः लघुतां याति ?

(ग) के वर्तमानेन कालेन प्रवर्तन्ते ?

(घ) कस्य सङ्गतिः शीतला ?

(ङ) अजीर्णे वारि किं करोति ?

2. **एकवाक्येन उत्तरत –**

(क) चन्दनतरोः प्रकृतिः कीदृशी ?

(ख) असाधुः किं प्रकाशयति ?

(ग) कः सत्त्वशालिनां साहाय्यं कुरुते ?

(घ) अनार्यसङ्गमात् किं वरम् ?

3. **रिक्तस्थानानि पूरयत –**

(क) तृणैरावेष्ट्यते रज्जुः ............................. ।

(ख) उष्णो दहति चाङ्गारः ........................... ।

(ग) अजीर्णे भैषजं वारि ............................ ।

(घ) .......................... वर्षत्यम्भोधरो मधुरमम्भः ।

(ङ) ............................ वृत्ततस्तु हतो हतः ।

4. **युग्ममेलनं कुरुत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | स्वयं प्रख्यापितैः गुणैः | शीतला |
| (ख) | साधुसङ्गतिः | अक्षीणः |
| (ग) | जगत् विजीयते | साधुसमागमः |
| (घ) | वित्ततः क्षीणो | जितक्रोधेन |
| (ङ) | सद्यः फलते | लघुतां याति |

5. **शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत –**

(क) साधुसङ्गतिः शीतला । ☐

(ख) तीर्थोदकं न शुद्धिम् अर्हति । ☐

(ग) साधुः दोषं प्रकाशयति । ☐

(घ) अनार्यसङ्गमात् महात्मभिः समं विरोधः । ☐

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) छेदेऽपि

(ख) रज्जुस्तया

(ग) सङ्गमाद्वरम्

(घ) नान्यत:

(ङ) नोत्साह:

7. **अधोलिखितानां अव्ययनां वाक्येषु प्रयोगं कुरुत –**

(क) अपि

(ख) सद्य:

(ग) एव

(घ) च

(ङ) इव

8. **अधोलिखितानां सूक्तिवाक्यानाम् अन्वयं कुरुत –**

(क) इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणै:।

(ख) उष्णो दहति चाङ्गार: शीत: कृष्णायते करम्।

(ग) छेदेऽपि चन्दनतरु: सुरभयति मुखं कुठारस्य।

(घ) गुणमेव वक्ति साधुर्दोषमसाधु: प्रकाशयति।

(ङ) क्षारं पिबति पयोधे: वर्षत्यम्भोधरो मधुरमम्भ:।

9. **अधोलिखितपदानां विलोमपदं लिखत –**

(क) लघुताम्

(ख) प्राज्ञ:

(ग) मितभाषिण:

(घ) क्षारम्

(ङ) उष्ण:

**योग्यताविस्तार: –**

- सूक्तिविषये भवान् किं जानाति संक्षेपेण लिखत।
- अन्यासां सूक्तीनां सङ्ग्रहणं कुरुत।
- स्वकीये पाठ्यपुस्तके प्रयुक्तानाम् अन्यसूक्तिवाक्यानां सङ्ग्रहं कुरुत।

# संस्कृतसाहित्यस्य इतिहासः

## रामायणम्

संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव प्रसिध्यति। रामायणात् प्राचीनः संस्कृतभाषायां काव्यलक्षणोपपन्नः कोऽपि ग्रन्थो नास्ति, अतः भारतीयैः रामायणमादिकाव्यं वाल्मिकिश्च आदिकविरभिधीयते। रामायणे न केवलं वीरगाथामात्रं न वा शुष्केतिहासमात्रं युद्धमेव वर्णितमपितु रूपकोपमाद्यलङ्कारयुतायां भाषायां प्रकृतेरपि वर्णनं कृतमतो रामायणं काव्यमिति स्वीक्रियते। रामायणे चतुर्विंशतिः सहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्त्री संहितापदेनाभिधीयते।

## महाभारतम्

मनुनाम्नाऽपि व्यवहारविषयतां गतोऽयं ग्रन्थो महाभारतमिति संज्ञा सौतिकृता।

प्रथम महाभारतमितिहासः पुराणमाख्यानकञ्चेति नामभिराख्यायते स्म। साम्प्रतिकास्तु महाभारतम् आचारशास्त्रम् नीतिशास्त्रं धर्मार्थकाममोक्षाख्यचतुर्वर्गसाधनं चामनन्ति। भारतं पञ्चमो वेदः इति सर्वत्र प्रचारितम्। महाभारतस्य अशीतिप्रतिशतभागोऽनेक विधोपदेशमयः विंशतिप्रतिशतभाग एवेतिहासप्रतिपादक इति अस्य नीतिशास्त्रेषु गणनोचिता। महाभारतं तदानीन्तनीं भारतीयां सभ्यतां प्रकाशयति। महाभारतमष्टादशसु पर्वसु विभक्तं वर्तते।

युद्धवर्णनमात्रं न व्यासस्य लक्ष्यमपितु भौतिकजीवनस्यासारतां प्रकाश्य प्राणिनां मोक्षमार्गे प्रवर्त्तनमेव व्यासस्य महाभारत प्रणयने उद्देश्यमासीत्। अतएवात्र शान्तो रसः प्रधानभूतः वीरस्तु रसोऽङ्गभावं गतः।

## पुराणानि

वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि विरचितानि। पुराणानां धार्मिकदृष्ट्या महत्त्वमधिकम्। पुराणानि राज्ञां वृत्तैः सह ऋषीणामपि वृत्तं बोधयन्ति। पुराणानि भौगोलिकसामग्रीम् अपि प्रस्तुवन्ति। पुराणेषु अतिशयोक्तिपूर्णा शैलीसमादृता येन लोकास्तानि अविश्वसनीयानि काल्पनिकानि च इति जानन्ति स्म। अष्टादशपुराणानां नामानि-मत्स्यपुराणम्, मार्कण्डेयपुराणम्, भविष्यपुराणम्, भागवतपुराणम्, ब्रह्माण्डपुराणम्, ब्रह्मपुराणम्, ब्रह्मवैवर्त्तपुराणम्, वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, वायुपुराणम्, अग्निपुराणम्, नारदपुराणम्, पदम्पुराणम्, लिङ्गपुराणम्, गरुडपुराणम्, कूर्मपुराणम्, स्कन्दपुराणम्।

## अश्वघोषः

अश्वघोषस्य समयः प्रथमशताब्द्याः पूर्वार्धे सामान्यरूपेण मन्यते। सौन्दरनन्दस्य पुष्पिकानुसारेण अश्वघोषः आयोध्यावासी आसीत्। सः सुवर्णाक्ष्याः पुत्रः आसीत्। अश्वघोषः वैदिकसाहित्यस्य कुशलपण्डितः वाल्मीकिरामायणस्य मर्मज्ञश्चापि आसीत्। अश्वघोषस्य निस्सन्देहसाहित्यिकरचनाः मुख्यतः तिस्रः एव सन्ति -

**बुद्धचरितम्** – अष्टाविंशति सर्गेषु निबद्धः एतत् अश्वघोषस्य कीर्तिस्तम्भः। अनेन प्रकारेण अश्वघोषः भगवान् बुद्धस्य संघर्षमयजीवनस्य विविधघटनानां सजीव-उज्ज्वल-रुचिरा चित्रम् एतत् ग्रन्थे चित्रितम् अकरोत्।

**सौन्दरनन्द** – अस्मिन् महाकाव्ये अष्टादश सर्गाः सन्ति।

## कालिदासः

कविकुलशिरोमणिः महाकविः कालिदासः संस्कृतभाषायाः श्रेष्ठतमः कविः अस्ति। कालिदासः द्वे महाकाव्ये, त्रीणि नाटकानि, द्वे खण्डकाव्ये च अरचयत्। तद्यथा महाकाव्यद्वयम्-रघुवंशम्, कुमारसम्भवम् नाटकानि अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, च, खण्डकाव्यद्वयम्-ऋतुसंहारम्, मेघदूतम्। कालिदासस्य रचनाशैली वैदर्भी अस्ति। भाषा लावण्यमयी सरला च अस्ति। रघुवंशमहाकाव्ये रघुवंशस्य राज्ञां वर्णनमस्ति। कुमारसम्भवमहाकाव्ये शिवपार्वत्योः विवाहवर्णनं तयोः पुत्रेण तारकासुरस्य वधः इति वृत्तान्तं वर्णितमस्ति अस्य सर्वाणि नाटकानि शृङ्गाररसयुक्तानि सन्ति। मेघदूतस्य कथावस्तु कविकल्पितमस्ति। ऋतुसंहारखण्डकाव्ये षण्णाम् ऋतूनां वर्णनमस्ति।

## श्रीहर्षः

श्रीहर्षः द्वादशशताब्दाः उत्तरार्द्धे अभवत्। कविवरः कान्यकुब्ज-नरेशस्य जयचन्द्रस्य सभापण्डितः आसीत्। श्रीहर्षस्य पितुः नाम हीरः मातुः नाम च मामल्लदेवी आसीत्। श्रीहर्षस्य स्थैर्य-विचारण-प्रकरणम्, विजय-प्रशस्तिः, खण्डनखण्डखाद्यम्, गोडोर्वीशकुलप्रशस्तिः, अर्णववर्णनम्, छिन्द-प्रशस्तिः, शिवशक्तिसिद्धिः, नवसाहसाङ्कचरितचम्पू, नैषधीयचरितम् चैताः रचनाः सन्ति।

## दण्डी

अलङ्कारशास्त्रस्य षड्सम्प्रदायाः प्रसिद्धाः सन्ति रसरीतिवक्रोक्ति ध्वन्यादयः। तत्र रीतिसम्प्रदायस्य आचार्येषु एकः आचार्यः दण्डी अस्ति। असौ काव्यादर्शाख्यं काव्यशास्त्रीयग्रन्थं प्रणीतवान् अनेन विराचिता अन्ये ग्रन्थाः दशकुमारचरितम्, छन्दोविचितिः अवन्तिसुन्दरी कथा च। दण्डिनः समयः ईसायाः सप्तम शताब्दी अस्ति।

## भासः

महाकविभासः आद्यनाटककारः इति विद्वान्सः मन्यन्ते। भासः त्रयोदश नाटकानि विरचितवान्। तेषां नामानि-प्रतिमा, अभिषेकम्, पञ्चरात्रम्, मध्यमव्यायोगः, दूतघटोत्कचः, कर्णभारम्, दूतवाक्यम्, उरुभङ्गम्, बालचरितम्, दरिद्रचारुदत्तम्, अविमारकम्, प्रतिज्ञायौगन्धरायणः, स्वप्नवासवदत्तम् च।

## उमास्वामी

आचार्य-उमास्वामी जैनदर्शनस्य प्रसिद्धः आचार्यः आसीत्। एषः कुन्दाकुन्दाचार्यस्य प्रमुखः शिष्यः आसीत्। एतस्य समयः विक्रमस्य प्रथमशताब्दयाः अन्तिमः तथा द्वितीयशताब्दयाः पूर्वार्धः अस्ति। एतस्य ''गृहपिच्छः'' इति उपाधिः अपि अस्ति। यत् महत्त्वं वैदिकेषु गीतायाः अस्ति तदैव एतेन विरचितस्य 'तत्त्वार्थसूत्रम्' इत्यस्य जैनदर्शने वर्तते। अस्य ग्रन्थस्य अपरं नाम 'मोक्षशास्त्रम्' अपि अस्ति। उक्तं च -

तत्त्वार्थसूत्रकर्त्तारं, गृहपिच्छोपलक्षितम्।
वन्दे गणीन्द्रसंजातमुमास्वामिमुनीश्वरम्॥

ग्रन्थेऽस्मिन् जैनदर्शनस्य सर्वेषां प्रमुखतत्त्वानां सम्यक् वर्णनमस्ति।

## शूद्रकः

शूद्रकस्य समयः प्रथमशताब्दी अस्ति। स्कन्दपुराणे, कथासरित्सागरे, हर्षचरिते, कादम्बर्यां च शूद्रकस्य उल्लेखः प्राप्यते। शूद्रकः मृच्छकटिकनामकं प्रकरणम् अरचयत्। मृच्छकटिकप्रकरणे चारुदत्तस्य कथायाः नाट्यरूपं दृश्यते। प्रकरणेऽस्मिन् प्रकृत्याः रमणीयं वर्णनं प्राप्यते। मृच्छकटिकप्रकरणे शूद्रकस्य नाट्यकला सफलीभूता दृश्यते। अस्य प्रकरणस्य भाषा सरला सौष्ठवयुक्ता च अस्ति। दशाङ्कात्मकमिदं प्रकरणमस्ति।

## भवभूतिः

संस्कृतरूपकपरम्परायां महाकविभवभूतेः स्थानं विशिष्टं वर्तते। भवभूतिः दक्षिणभारते न्यवसत्। अस्य पैतृकग्रामः पद्मपुरमासीत्। कृष्णयजुर्वेदस्य तैत्तिरीयशाखाध्यायी आसीत् अयं महाकविः। काश्यपगोत्रीयः अयं कविः। पङ्क्तिपावनब्राह्मणेषु अस्य कवेः पूर्वजानां च गणना अभवत्। अस्य प्रसिद्धं नाम उदुम्बरः इत्यस्ति। अस्य जनकस्य नाम नीलकण्ठः, जनन्याः नाम जतुकर्णी च आसीत्। भवभूतेः गुरुः ज्ञाननिधिनामा आसीत्। श्रीकण्ठपदलाञ्छन इत्यस्य कवेः उपाधिः आसीत्। एष कविः पदवाक्यप्रमाणज्ञः अर्थात् न्यायव्याकरणमीमांसाशास्त्रस्य ज्ञाता आसीत्। अनेन महाकविना रूपकत्रयं विरचितम् तद्यथा-मालतीमाधवं प्रकरणम्, महावीरचरितम् उत्तररामचरितञ्चेति द्वे नाटके स्तः मालतीमाधवं शृङ्गाररसप्रधानं प्रकरणमस्ति। प्रकरणं रूपकस्य एकः प्रकारः। महावीरचरितं वीररसयुक्तं नाटकमस्ति। करुणरसप्रधानम् उत्तररामचरितं नाटकमस्ति। नाटकेऽस्मिन् भगवतः रामस्य उत्तरचरितं वर्णितमस्ति। भवभूतेः समयः अष्टमी शताब्दी आसीत्।

## समन्तभद्रः

समन्तभद्रः कदम्बराजवंशस्य क्षत्रियराजकुमारः आसीत्। एतस्य बाल्यस्य नाम शान्तिवर्मा अस्ति। अस्य जन्म दक्षिणभारते कावेरी नद्याः तटे 'उरगपुर' नामक नगरे अभवत्। अस्य अस्तित्वं विक्रमस्य एकशतम् अष्टत्रिंशति पर्यन्तमस्तीति। एते जैनसिद्धान्तानां मर्मज्ञः आसन्। ते सक्यमेव लिखन्ति -

''वादार्थी विचराम्यहं नरपते, शार्दूल विक्रीडितम्''

'आप्तमीमांसा' अथवा 'देवागमस्तोत्र' एतस्य मुख्या रचना अस्ति या 'एतोजरूपे' विद्यते। एतदतिरिच्य समन्तभद्रेण तत्त्वानुशासनं, युक्त्यनुशासनं, स्वयम्भूस्तोत्रं, जिनस्तुतिशतकं, रत्नकरण्डश्रावकाचारं, प्रमाणपदार्थं, कर्मप्राभृतटीका विरचितम्।

## बाणभट्ट:

वात्स्यायनगोत्रोत्पन्न: बाणभट्ट: सप्तम्यां शताब्द्यां प्रादुरभूत् संस्कृतसाहित्यस्य श्रेष्ठगद्यरचनाकाररूपेण अस्य कवे: प्रसिद्धिरस्ति। शोणभद्र नदीतटे प्रीतिकूटक्षेत्रे बाणस्य शैशवं व्यतीतम्। हर्षचरितस्य आरम्भे गद्ये बाणेन स्ववंशस्य परिचय: दत्तोऽस्ति। 'हर्षचरितं' लक्षणग्रन्थानुसारम् आख्यायिका अस्ति। अस्याम् आख्यायिकायाम् अष्टौ उच्छ्वासा: सन्ति। बाणभट्टस्य अपर: ग्रन्थ: 'कादम्बरी' अस्ति।

## विशाखदत्त:

विशाखदत्त: बटेश्वरस्य पौत्र: भास्करदत्तस्य पुत्र: आसीत्। ईशापूर्वचतुर्थशताब्द्याम् असौ प्रादुरभूत्। अस्य महाकवे: देवीचन्द्रगुप्ताभिसारिकावञ्चितकमुद्राराक्षसम् इति त्रयाणां ग्रन्थानामुल्लेख: प्राप्यते किन्तु साम्प्रतं केवलं मुद्राराक्षसमेव उपलब्धमस्ति। मुद्राराक्षसम् ऐतिहासिकघटनाप्रधाननाटकमस्ति। सप्ताङ्कात्मकमिदं नाटकमस्ति मुद्राराक्षसस्य नायक: चाणक्य: अस्ति। प्रतिनायकरूपेण राक्षसस्य वर्णनम् अस्ति। नाटकस्य कथाया: मूलस्रोत: वृहत्कथा इत्यस्ति। नाटकस्य भाषा सरला प्रभावशालिनी च अस्ति।

## पण्डितराजजगन्नाथ:

संस्कृतस्य परवर्तिकाव्यशास्त्रिषु जगन्नाथ: महत्त्वपूर्ण: आचार्य:। एष न केवलं काव्यशास्त्री अपितु उत्कृष्ट: महाकवि: वर्तते। अनेन विरचितानि अनेकानि काव्यानि प्रसिद्धानि सन्ति। तद्यथा गङ्गालहरी, यमुनालहरी, भामिनीविलास: इत्यादीनि। काव्यशास्त्रमधिकृत्य असौ रसगङ्गाधरनामानं प्रसिद्धं ग्रन्थं रचितवान्। अस्य समय: ईशवीयसप्तदशशताब्दी अस्ति। एष: मुगलशासकस्य शाहजहाँ इत्याख्यस्य राजसभायाम् आसीत्। प्रसिद्धवैय्याकरणेन अप्पयदीक्षितेन सह अस्य वैर: चर्चित: अस्ति।

## जयदेव:

कविप्रवरजयदेवस्य जन्म बङ्गप्रान्ते अभवत्। तस्य पितु: नाम भोजदेव: मातु: नाम राधादेवी यासीत्। तस्य विवाह: पद्मावत्या सह सञ्जात:। जयदेव: बङ्गप्रान्तस्य राजा लक्ष्मणसेनस्य सभायां प्रमुखरत्नमासीत्। ''गीतगोविन्दम्'' जयदेवस्य प्रमुखा रचना अस्ति।

## नारायणपण्डित:

नारायणपण्डित: संस्कृतसाहित्ये अतीव प्रसिद्ध: अस्ति। हितोपदेश: नारायणपण्डितस्य प्रमुखा रचना अस्ति। हितोपदेशे बालावबोधनार्थम् अनेका: कथा: सन्ति।

## भारवि:

भारवि: संस्कृतसाहित्ये अलंकारिकशैल्या: प्रणेता रूपेण प्रसिद्ध: अस्ति। अवन्तिसुन्दरीकथाधारेण भारवि: दक्षिणभारतीय: आसीत्, भारवि: विष्णुवर्धनस्य सभापण्डित: आसीत्।

भारवे: 'किरातार्जुनीयम्' महाकाव्यं संस्कृतवाङ्मये विख्यात: अस्ति। अस्मिन् महाकाव्ये १८ सर्गा: सन्ति। किरातार्जुनीयम् महाकाव्ये किरातवेशधारी भगवान्शंकर-अर्जुनयो: मध्ये युद्धस्य वर्णनम् अस्ति।

भरवि: स्वकाव्ये अर्थगौरवाय विश्वप्रसिद्ध अस्ति।

उक्तञ्च – ''भारवेरर्थगौरवम्''

## सुबन्धु:

संस्कृतगद्यपरम्परायां सुबन्धो: विशिष्टं स्थानं वर्तते। यद्यपि सुबन्धो: समय: अनिश्चित: अस्ति तथापि सुबन्धो: भवभूते: पूर्ववर्ती आसीत् इति मन्यते। वासवदत्ता सुबन्धो: उपलब्ध उत्कृष्टकृति: अस्ति। वासवदत्तायां राजकुमारकन्दर्पकेतु: राजकुमारी वासवदत्ताया: प्रणय कथा वर्णिता।

## भर्तृहरि:

महाकवे: भर्तृहरि: कविता यावत् प्रसिद्धा अस्ति तावत् तस्य व्यक्तित्व: अज्ञात: अस्ति। दन्तकथाधारेण केचन् जना: भर्तृहरि: राजा इति मन्यन्ते। वैदिकधर्मस्य आचार-विचार-पद्धति-प्रक्रियायां तस्य विश्वास: आसीत्। स: प्रसिद्ध: वैयाकरण: आसीत्।

भर्तृहरि: नीतिशतक-शृङ्गारशतक-वैराग्यशतकस्य रचनाकार: अस्ति।